## क्रीडोऽनुसंपरिभ्यश्च । (२१/२६८७)

'क्रीडृ विहारे' (धा.पा. ३५०), [1]एतस्माद् अनु सम् परि इत्येवंपूर्वाद् आङ्पूर्वाच्चात्मनेपदं भवति । अनुक्रीडते । [2]सङ्क्रीडते । परिक्रीडते । [3]आङः खल्वपि, आक्रीडते । समा साहचर्यादन्वादि[4]रुपसर्गो गृह्यते, [5]तेनेह कर्मप्रवचनीयप्रयोगे न भवति, माणवकमनु क्रीडति[6] (म.भा. १.२८१) ।

[३४] समोऽकूजने इति वक्तव्यम् । (म.भा. १.२८०)

[7]सङ्क्रीडन्ति शकटानि ।

[३५] [8]आगमेः क्षमायामात्मनेपदं वक्तव्यम् । (म.भा. १.२८०)

क्षमा उपेक्षा, कालहरणम् इति यावत् । आगमयस्व तावन्माणवकम् (म.भा. १.२८०) ।

[३६] शिक्षेर्जिज्ञासायाम् । (म. भा. १.२८०)

विद्यासु शिक्षते[9] (म. भा. १.२८०) ।

[३७] आशिषि नाथः । (म. भा. १.२८०)

[10]सर्पिषो नाथते । मधुनो नाथते (म. भा. १.२८०) । आशिषि इति किम् ? माणवकमनुनाथति ।

[३८] [11]हरतेर्गतताच्छील्ये । (म. भा. १.२८०)

पैतृकमश्वा अनुहरन्ते । मातृकं गावोऽनुहरन्ते (म. भा. १.२८०) । गतताच्छील्ये इति किम् ? मातुरनुहरति[12] ।

[३९] किरतेर्हर्षजीविकाकुलायकरणेष्विति [13]वक्तव्यम् । (म.भा. १.२८०)

अपस्किरते [14]वृषभो हृष्टः । [15]जीविकायाम्–अपस्किरते कुक्कुटो भक्षार्थी । कुलायकरणे––अपस्किरते श्वा आश्रयार्थी (म. भा. १.२८०) । [16]हर्षादिषु इति किम् ? अपकिरति कुसुमम्[17] ।

[४०] आङि नुप्रच्छचोरुपसङ्ख्यानम् । (म.भा. १.२८०)

आनुते शृगालः । आपृच्छते गुरुम् ।

[४१] शप [18]उपलम्भन इति वक्तव्यम् । (म. भा. १.२८०)

वाचा शरीरस्पर्शनमुपलम्भनम् । देवदत्ताय शपते । यज्ञदत्ताय शपते (म.भा. १.२८०) । [19]उपलम्भने इति किम् ? शपति ॥

---

1. अस्मात् अ. 2. सङ्क्रीडते नास्ति फ. 3. आङः खल्वपि नास्ति ग. 4. उपसर्गाः गृह्यन्ते ग. 5. तेन नास्ति फ. 6. इति इत्यधिकम् ह. 7. इह मा भूत् इत्यधिकम् अ. ग. ह. 8. क्षमायामागमेः क. ब. क. ड. ग. न्या. प. मं. 9. धनुषि शिक्षते इत्यधिकम् अ. क. ड. फ. ग. प. मं. 10. उदाहरणमिदं नास्ति ग. 11. गतिताच्छील्ये नास्ति फ. 12. पितुरनुहरति इत्यधिकम् ह. 13. वक्तव्यम् नास्ति क. 14. वृषभो हर्षादिमात्रसत्त्वे तु यद्यपि तङ प्राप्तः तद्विधौ चतुष्पाच्छकुनिकर्तृकस्य आलेखनस्य चानिमित्तत्वात् तथापि शब्दशक्तिस्वाभाव्यात् सुडभावो नेष्यते । तेन गजोऽपकिरति इत्येवमाहुः । 'ऋत इद्धातोः' अपशब्दाच्छकुनिषु आलेखने इति सुट् इत्यधिकम् अ. 15. जीविकायाम् नास्ति फ. 16. हर्षादिषु–कुसुमम् नास्ति ग. 17. इह तङसुटौ न। 18. उपालम्भने ड. 19. उपालम्भने ड.